अभ्रं, क्ली, (अपो बिभर्त्ति, अप् + भृ + कर्त्तरि कः।) मेघः। इत्यमरः। मुस्तातृणं। अभ्रकधातुः। इति राजनिर्घण्टः॥

अभ्रमातङ्गः, पुं, (अभ्रस्य, मेघस्य अधिपः मातङ्गः शाकपार्थिवादित्वात् समासः, मध्यपदलोपश्च।) ऐरावतः। इत्यमरः॥

अभ्रिः, स्त्री, (अपः नौकामलापनयनाय बिभर्त्ति धारयति, अप् + भृ + किः।) काष्ठकुद्दालः। नौकामलापनयनार्थकुद्दालाकृतिकाष्ठं। इत्यमरः॥ (पणादिद्रव्याणां समीकरणपात्रं। तीक्ष्णाग्रो लौहदण्डः।
"अभ्रिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः।
पलालभारकं षण्डे सैसकञ्चैकमासकं"॥
इति मनुः।)

अभ्रियं, त्रि, (अभ्रे मेघे भवं, अभ्र + घ तस्य इय।) मेघोद्भववस्तु। इत्यमरः॥

अब्रह्मचर्य्यकं, क्ली, (ब्रह्मचर्य्यविरोधि, विरोधे नञ्समासः। ततः स्वार्थे कन्।) मैथुनं। इति त्रिकाण्डशेषः। ब्रह्मचर्य्यशून्ये त्रि॥

अब्रह्मण्यं, क्ली, (ब्रह्मणि ब्राह्मणोचितकर्म्मणि अहिंसादौ साधु, ब्रह्मन् + यत्, नञ्समासः।) नाश्योक्तौ नायं वध्य इत्याकारोक्तिः। अवधयाच्ञा। तत्पर्य्यायः। अवध्योक्तिः २। इत्यमरः॥ ("नेपथ्ये अब्रह्मण्यमब्रह्मण्यं। अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडनमब्रह्मण्यमुद्घोषितं"। इति उत्तरचरिते। वेदविरुद्धं अतिनिन्दितं कर्म्म। निरतिशयव्यसनशोकादिप्रकाशोक्तिरियं।)

अभ इ ङ ध्वनौ। इति कविकल्पद्रुमः॥ इ अम्भते। ङ अम्भते। इति दुर्गादासः॥

अभयं, क्ली, (भयस्याभावः इत्यव्ययीभावः, यद्वा नास्ति भयं यस्मात् तत्, हरीतक्यां दुर्गामूर्त्तिभेदे च स्त्री।) वीरणमूलं। इत्यमरः॥ भयाभावः। ("नातः परतरो धर्म्मो नृपाणां यद्रणार्ज्जितं"।
विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा"।
इति याज्ञवल्क्यः।
"योदत्वा सर्व्वभूतेभ्यः प्रव्रजत्यभयं गृहात्।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः"॥
इति मनुः।)
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी"॥
इति श्रीभगवद्गीता॥ भयरहिते त्रि। इति विश्वः॥

अभयडिण्डिमः, पुं, (अभयाय स्वयोद्धृभयाभावाय डिण्डिमः।) युद्धढक्का। सङ्ग्रामपटहः। इति त्रिकाण्डशेषः॥

अभया, स्त्री, (नास्ति भयं यस्याः सा।) हरीतकी। इत्यमरः॥ चम्पादेशजातपञ्चशिरा हरीतकी। सा नेत्ररोगे प्रशस्ता। इति राजवल्लभः॥ (दुर्गा।)

अभक्ष्यं, त्रि, (भक्ष + कर्म्मणि ण्यत्, नञ्समासः।) अभक्षणीयं। अखाद्यं। यथा,—
"अधार्य्यं चर्म्म मे सद्भिः करिष्यसि किमस्थिभिः।
अभक्ष्यं चैव मे मांसं त्वादृशैर्ब्रह्मचारिभिः"॥
इति रामायणं॥ (भोजनायोग्यं वस्तु, भक्षणाय मन्वादिभिः शास्त्रकारैः निषिद्धं द्विजातिभिः वर्ज्जनीयं वस्तु। तानि च यथा, लशुनगृञ्जनपलाण्डुच्छत्राणि चैणि स्थूलकन्दशाकानि। विष्ठादिजातानि तण्डुलीयादीनि च। लोहितवृक्षनिर्य्यासः। छेदनोद्भववृक्षनिर्य्यासः। शेलुफलं। गव्यं। पेयूषञ्च। देवाद्यनुद्देशेन आत्मार्थं पक्वाः कृसरसंयावपायसापूपाः। असंस्कृत पशुमांसं। नैवेद्यार्थमन्नानि निवेदनात् प्राक्। हवींषि च होमात् प्राक् इत्यादि।)

अभाजनं, क्ली, (न भाजनं, नञ्समासः।) अपात्रं। अयोग्यं। यथा,—
"दीधीवेवीट्समः कश्चित् गुणवृद्ध्योरभाजनं।
क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते"॥
इति काव्यप्रकाशः॥ पात्ररहिते त्रि॥

अभावः, पुं, (भू + भावे घञ्, नञ्समासः।) मरणं। असत्ता। इति विश्वमेदिनी॥
"अस्ति पुत्रो वशे यस्य भृत्योभार्य्या तथैव च।
अभावे सति सन्तोषः स्वर्गस्थोऽसौ महीतले"॥
इति चाणक्यः।
("अन्याभावे तु विप्रस्य प्राणेवैवोपपादयेत्।
साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः"॥
इति मनुः।) द्रव्यादिषट्कभिन्नः। स द्विविधः। संसर्गाभावः १ अन्योन्याभावश्च २। इति भाषापरिच्छेदः॥ भावशून्यः भावः स्थायिभावादिरिति अलङ्कारशास्त्रं॥

अभावनीयः, त्रि, अचिन्तनीयः। चौरादिकचिन्तनार्थभूधातोः कर्म्मण्यनीये नञ्समासः॥

अभाषणं, क्ली, (भाष + ल्युट्, नञ्समासः।) अकथनं। मौनं। इत्यमरः॥

अभि, व्य, (न भाति, न + भा + कि।) उपसर्गविशेषः। अस्यार्थाः। समन्तात्। उभयार्थः। वीप्सा। इत्थम्भावः। धर्षणं। इति दुर्गादासः॥ अभिलाषः। आभिमुख्यं। इति मेदिनी॥ चिह्नं। इति वोपदेवहेमचन्द्रौ॥

अभिकः, त्रि, (अभिकामयते इति अनुकाभिकेति साधुः।) कामी। कामुकः। इत्यमरः॥

अभिक्रमः, पुं, (अभि + क्रम + घञ्। नोदात्तेति वृद्ध्यभावः। अभिक्रम्यते कर्म्मणा प्रारभ्यते इति व्युत्पत्त्या कर्म्मारम्भफले प्रारम्भे च।) अभीतयोधादेर्युद्धे शत्रुसम्मुखगमनं। आरोहणं। इति हेमचन्द्रः॥

अभिख्या, स्त्री, (अभि + ख्या + अङ्।) नाम। शोभा। कीर्त्तिः। इति मेदिनी॥ आख्यानं। इति शब्दरत्नावली॥ (शोभा। सौन्दर्य्यं। रमणीयता। [इति रघुवंशे।
"काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेशयोः"।
"कामप्यभिख्यां स्फुरितैरपुष्य-
दासन्नलावण्यफलोऽधरोष्ठः"।
इति कुमारसम्भवे। यशः॥)

अभिग्रस्तः, त्रि, (अभि + ग्रस् + कर्म्मणि क्तः।) शत्रुणाक्रान्तः। इत्यभिपन्नशब्दार्थे अमरः॥ (अभियुक्तः।)

अभिग्रहः, पुं, (अभि + ग्रह् + भावे अप्।) अभियोगः। इत्यमरः॥ कलहाह्वानं। अपचिकीर्षया अतिक्रम्याक्रमणं। आभिमुख्येन युद्धादिप्रवृत्तिः। इति तट्टीकायां भरतः॥ गौरवं। अभिग्रहणं। इति मेदिनी॥ लुट् इति भाषा। (चौर्य्यकरणं।)

अभिग्रहणं, क्ली, (अभि + ग्रह + भावे ल्युट्।) अभिहारः। इत्यमरः॥ चौर्य्यकरणं। सम्मुखे हरणं। इति तट्टीकायां भरतः॥ (साहसं। अपचिकीर्षया अतिक्रम्याक्रमणं।)

अभिघातः, पुं, (अभि + हन् + भावे घञ्।) दण्डादिभिरभिहननं। आघातः। यथा,—
"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।
इति माधवकरः॥ शब्दादौ कवर्गादिवर्गाणां पूर्व्वस्थितचतुर्थद्वितीयतृतीयचतुर्थवर्णाः क्रमेण परस्थितवर्गैकैकादिचिवर्णयुक्ताः। तत्र क्ली। यथा—
"अभिघातं स्यात् पूर्व्वं वेददिग्भिस्त्रिवर्णाश्चेत्।
नगवर्णाणां परतो धरणीचन्द्रदिरामाख्याः"॥
इति केरलग्रन्थः॥ (प्रहारः। अभिहननं। आघातः।
"चञ्चद्भुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरुयुगलस्य सुयोधनस्य"।
इति वेणीसंहारे। सङ्घर्षणं। संमर्द्दः। पीड़नं। क्लेशदानं। शोकक्षोभः।
"सम्भवांश्च वियोनीषु दुःखप्रायासु नित्यशः।
शीतातपाभिघातांश्च विविधानि भयानि च"॥
इति मनुः। प्रतीकारः। अपसारणं।)

अभिघाती, [न्] पुं, (आभिमुख्येन हन्ति, अभि + हन् + णिनि।) शत्रुः। इत्यमरः॥ (विपक्षः॥ आक्रमणकारी।
"एकदा न विगृह्णीयात् बहून् राजाभिघातिनः।
सदर्पोऽप्युरगः कीटैर्बहुभिर्नश्यति ध्रुवं"॥
इति हितोपदेशे। पीड़ाजनकः। आघातकारी।
"मुख्यवक्षिप्तमन्त्रेण परमर्म्माभिघातिना।
भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना"।
इति रामायणे। प्रतीकारः। अपसारणं।)

अभिघारः, पुं, (अभि घार्य्यते समन्तात् वह्नौ सिच्यते, अभि + घृ क्षरणे णिच् + अच्।) घृतं। इति राजनिर्घण्टः॥

अभिचरः, पुं, (आभिमुख्येन सेवायै चरति, अभि + चर् + ट।) दासः। भृत्यः। इति हेमचन्द्रः॥

अभिचारः, पुं, (आभिमुख्येन शत्रुवधार्थं चारः कार्य्यकरणं अभि + चर + भावे घञ्।) हिंसाकर्म्म। इत्यमरः॥ अथर्व्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितमारणोच्चाटनादिहिंसात्मककर्म। इति भरतः॥ मारणादिफलकतान्त्रिकप्रयोगविशेषः। स षड्विधः। मारणं १ मोहनं २ स्तम्भनं ३ विद्वेषणं ४ उच्चाटनं ५ वशीकरणं ६। इति तन्त्रसारः॥ उपपातकविशेषः। इति प्रायश्चित्तविवेकः। स तु श्येनादियज्ञेनानपराधस्य मारणं। इति कुल्लूकभट्टः॥ यथा,—